# Pitristotram by Vyasa Maharshi

# व्यासकृतं पितृस्तोत्रम्

## Document Information

Text title : pitRistotram vyAsakRitam Hymn for the Father by Vyasa Maharshi

File name : pitRRistotraMvyAsakRRitam.itx

Category : deities_misc, vyAsa, bRihaddharmapurANam

Location : doc_deities_misc

Author : Vyasa

Proofread by : NA

Description/comments : Brihaddharmapuranam | pUrvakhaNDaH | adhyAyaH 2| 1332 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# व्यासकृतं पितृस्तोत्रम्

जाबालिरुवाच ।
गुरून् वद महाभाग वेदव्यास जगद्गुरो ।
गुरूणां तारतम्यञ्च कस्मात् किं फलमुच्यते ॥ १॥

व्यास उवाच ।
माता पिता गुरुः श्रेयान् ज्येष्ठभ्राता पितामहः ।
श्वशुरो मातुलश्चैव तथा मातामहः स्मृतः ॥ २॥

पित्तुर्ज्येष्ठः कनिष्ठश्च भ्राता ज्येष्ठा निजस्वसा ।
पितुःस्वसा जनन्याश्च स्वसा गुरुजनाः स्मृताः ॥ ३॥

पत्न्यः पितामहादीनां तथैव गुरवः स्मृताः ।
एतेषु हि पिता श्रेयान् गुरुरेव महागुरुः ॥ ४॥

पिता धर्मः पिता स्वर्गः पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः ॥ ५॥

पिता यस्य क्वचिद्रुष्टो न तस्य कस्यचिद्गतिः ।
जपो दानं तपो होमः स्नानं तीर्थक्रियाविधिः ।
वृथैव तस्य सर्वाणि कर्माण्यन्यानि कानिचित् ॥ ६॥

करोति सर्वदेवेशं पितरं चानुतप्य यः ।
अनुतापः पितुस्तीव्रं विषं दहति यं सुतम् ।
जपादि विफलं तत्र दग्धक्षित्युप्तवीजवत् ॥ ७॥

पित्रर्थे पुण्यकर्माणि कुर्यात् सर्वाणि सत्सुतः ।
तेनाननुमतोऽप्येवं कुर्वन्नेवावसीदति ॥ ८॥

यत्नात्तु पितरं यस्तु कियत्पुण्यञ्च कारयेत् ।
स तत्पुण्यफलं कोटिगुणमाप्नोत्यसंशयम् ॥ ९॥

शृणु वक्ष्ये पितुः स्तोत्रं विष्णवे ब्रह्मणोदितम् ।
नाभिपद्मोद्भवो येन तुष्टाव पितरं स तम् ॥ १० ॥

ब्रह्मोवाच ।
ॐ नमः पित्रे जन्मदात्रे सर्वदेवमयाय च ।
सुखदाय प्रसन्नाय सुप्रीताय महात्मने ॥ ११ ॥

सर्वयज्ञस्वरूपाय स्वर्गाय परमेष्ठिने ।
सर्वतीर्थावलोकाय करुणासागराय च ॥ १२ ॥

नमः सदाशुतोषाय शिवरूपाय ते नमः ।
सदापराधक्षमिणे सुखाय सुखदाय च ॥ १३ ॥

दुर्लभं मानुषमिदं येन लब्धं मया वपुः ।
सम्भावनीयं धर्मार्थे तस्मै पित्रे नमो नमः ॥ १४ ॥

तीर्थस्नान-तपोहोम-जपादि यस्य दर्शनम् ।
महागुरोश्च गुरवे तस्मै पित्रे नमो नमः ॥ १५ ॥

यस्य प्रणामस्तवनात् कोटिशः पितृतर्पणम् ।
अश्वमेधशतैस्तुल्यं तस्मै पित्रे नमो नमः ॥ १६ ॥

इदं स्तोत्रं पितुः पुण्यं यः पठेत् प्रयतो नरः ।
प्रत्यहं प्रातरुत्थाय पितृश्राद्धदिनेऽपि च ॥ १७ ॥

स्वजन्मदिवसे साक्षात् पितुरग्रे स्थितोऽपि वा ।
न तस्य दुर्लभं किञ्चित् सर्वज्ञतादिवाञ्छितम् ॥ १८ ॥

नानापकर्म कृत्वापि यः स्तौति पितरं सुतः ।
स ध्रुवं प्रविधायैव प्रायश्चित्तं सुखी भवेत् ।
पितुः प्रीतिकरो नित्यं सर्वकर्माण्यथार्हति ॥ १९ ॥ २० ॥

॥ इति बृहद्धर्मपुराणे पितृमातृभक्तिर्नाम
द्वितीयोऽध्यायान्तर्गतं व्यासप्रोक्तं पितृस्तोत्रं सम्पूर्णम् ।

॥ बृहद्धर्मपुराणम् । पूर्वखण्डः । अध्यायः २। १३-३२ ॥

In the second chapter of the BrihaddharmapurANam, this stotra is followed after dharmamahimA, and

continues with mAtRistotraM, a hymn on mother.

*Pitristotram by Vyasa Maharshi*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*